**BANKURA UNIVERSITY**

1st Semester Examination, 2021

SANSKRIT

Course ID: 10951

Course Code: SNSK-101C

Course Title: Vedic Studies

Full Marks: 40

Time: 2hrs

**The figures in the margin indicate full marks**

**Answer all the questions.**

**Unit-I**

1. **ऋषिच्छन्दोदेवतानिर्देशपुरस्सरं निम्नोद्धृतेषु मन्त्रेषु द्वयोः व्याख्या कार्या।** **5x2=10**

(अ) अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

(आ) अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥

(इ) इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम्।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः॥

(ई) एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥

2. **अधस्थितेषु यथेच्छं पञ्चप्रश्नानाम् उत्तरं देयम्।** **2x5=10**

(अ) देवशब्दस्य निर्वचनं लिख्यताम्।

(आ) विश्वामित्रः किमर्थं नदीद्वयं प्राप्तवानस्ति ?

(इ) पुरुषसूक्तमनुसृत्य पुरुषशब्दस्य व्याख्या कार्या।

(ई) त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः - इति मन्त्रांशस्य कोऽभिप्रायः ?

(उ) नासदीयसूक्तानुसारं 'यदि पूर्वमिदं जगन्नासीत्' कथं तर्हि तस्य जन्म? इति आलोच्यताम्।

(ऊ)नदीद्वयस्य खननकार्यं केन कृतं कथञ्चेति लेख्यम्।

(ऋ) यं कामये तं तमुग्रं तं ब्राह्मणं तमृषिं तं सुमेधाम् – अस्य मन्त्रांशस्य अर्थः प्रतिपाद्यताम्।

(ऌ) चतुर्वर्णानामुत्पत्तिवर्णनम् उपस्थाप्यताम्।

**Unit-II**

3. **कस्यचिदेकस्य उत्तरं देयम्।** **10x1= 10**

(अ) कथं सायणेन ऋग्वेदं विहाय यजुर्वेदस्य व्याख्यानमादौ कृतमिति यथाग्रन्थं वर्णनीयम्।

(आ वेदस्य लक्षणं प्रमाणञ्चास्ति न वेति विषयमाश्रित्य पूर्वोत्तरपक्षयोः मतं सायणदिशा प्रतिपादनीयम्।

(इ) सायणदिशा मन्त्रब्राह्मणयोः स्वरूपनिर्णयः करणीयः।

**Unit –III**

4. **अधोलिखितेषु निरुक्तवचनेषु द्वयोः आचार्ययास्कदिशा व्याख्या कार्या।** **5x2 = 10**

(अ) न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः।

(आ) न सर्वाणीति गार्ग्यो वैयाकरणानां चैके।

(इ) अथापि याज्ञे दैवतेन बहवः प्रदेशाः भवन्ति, तदेतेनोपेक्षितव्यम्।

Scanned by CamScanner